**Roll No. ...................................**

# E–3507

## M. A. (Final) EXAMINATION, 2021

SANSKRIT

Paper Sixth

(काव्यम्)

*Time : Three Hours* ] [ *Maximum Marks : 100*

सूचना : सर्वे प्रश्नाः समाधेयाः। सर्वे प्रश्नाः समानाङ्काः।

इकाई—**I**

1. कयोश्चिद् द्वयोः पद्ययोः व्याख्या विधेया— प्रत्येक 10

(i) जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥

(ii) मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः॥

**P. T. O.**

(iii) तां कस्याञ्चिद् भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत कलत्रः।
दृष्टे सूर्ये पुनरपि भवान् वोहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥

इकाई—**II**

2. कयोश्चिद् द्वयोः पद्ययोः व्याख्या कर्तव्या— प्रत्येक 10

(i) विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः॥

(ii) तन्वी श्यामा शिखरिदशना पक्वविम्वाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रास्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥

(iii) इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
तामुत्काण्ठोच्छ्वसित-हृदया वीक्ष्य सम्भाव्य चैवम्।
श्रीष्यत्यस्मात् परमवहिता सैम्य सीमन्तिनीनां
कान्तोदन्तः सहृदुपनतः सङ्गमात् किञ्चिदूनः॥

## इकाई—III

3. केचिद् द्वे पद्ये सप्रसंगं व्याख्यायेताम्— प्रत्येक 10

(i) गतं तिरश्चीनमनूरुसारथेः
प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।
पतत्यधो धाम विसारि सर्वतः
किमेतदित्याकुलमीक्षितं जनैः॥

(ii) तमर्घ्यमर्घ्यादिकयादिपूरुषः
सपर्यया साधु स पर्यपूपुजत्।
गृहानुपैतुं प्रणयादभीप्सवो
भवन्ति नापुण्यकृतां मनीषिणः॥

(iii) विलोकनेनैव तवामुना मुनेः।
कृतः कृतार्थोऽस्मि निवर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोऽथ वा श्रेयसि केन तृप्यते॥

## इकाई—IV

4. कयोश्चिद् द्वयोः श्लोकयोः व्याख्यां कुरुत— प्रत्येक 10

(i) निवासश्चिन्तायाः परपरिभवो वैरमपरं
जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्।
वनं गन्तुं बुद्धिर्भवति च कलत्रात् परिभवो
हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च॥

(ii) द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव।

दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव॥

(iii) तं तस्य स्वरसंक्रमं मृदुगिरः श्लिष्टञ्च तन्त्रीस्वनं

वर्णानामपि मूर्च्छनान्तरगतं तारं विरामे मृदुम्।

हेलासंयमितं पुनश्चललितं रागाद् द्विरुच्चारितं

यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव॥

## इकाई—V

5. (अ) कालिदासदिशा मेघमार्गवर्णनं कुरुत। 10

अथवा

मेघदूतमाश्रित्य कालिदासस्य वर्णनवैशिष्ट्यं प्रतिपादयत।

(ब) शिशुपालवधमाश्रित्य नारदमुनेः वर्णनं कुरुत। 10

अथवा

मृच्छकटिकमाश्रित्य चारुदत्तस्य चरित्रं चित्रयत।